# vidyAdAnavAksarasvatIhRidayastotram

# વિદ્યાદાનવાક્સરસ્વતીહૃદયસ્તોત્રમ્

## Document Information

Text title : vidyAdAnavAksarasvatIhRidayastotra

File name : vidyAdAnavAksarasvatIhRidayastotra.itx

Category : hRidaya, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : February 2, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# વિદ્યાદાનવાક્સરસ્વતીહૃદયસ્તોત્રમ્

ૐ અસ્ય શ્રી વાગ્વાદિની શારદામન્ત્રસ્ય માર્કણ્ડેયાશ્વલાયનૌ ઋષી,
સ્રગ્ધરા અનુષ્ટુભૌ છન્દસી,
શ્રીસરસ્વતી દેવતા । શ્રીસરસ્વતીપ્રસાદસિદ્ધ્યર્થે વિનિયોગઃ ॥
ધ્યાનમ્ ॥
શુક્લાં બ્રહ્મવિચારસારપરમાં આદ્યાં જગદ્વ્યાપિનીં
વીણાપુસ્તકધારિણીમભયદાં જાડ્યાન્ધકારાપહામ્ ।
હસ્તે સ્ફાટિકમાલિકાં વિદધતીં પદ્માસને સંસ્થિતાં
વન્દે તાં પરમેશ્વરીં ભગવતીં બુદ્ધિપ્રદાં શારદામ્ ॥ ૧॥

બ્રહ્મોવાચ ।
હ્રીં હ્રીં હૃદ્યૈકવિદ્યે શશિરુચિકમલાકલ્પવિસ્પષ્ટશોભે
ભવ્યે ભવ્યાનુકૂલે કુમતિવનદહે વિશ્વવન્દ્યાઙ્ઘ્રિપદ્મે ।
પદ્મે પદ્મોપવિષ્ટે પ્રણતજનમનોમોદસમ્પાદયિત્રિ
પ્રોત્પ્લુષ્ટા જ્ઞાનકૂટે હરિનિજદયિતે દેવિ સંસારસારે ॥ ૨॥

ઐં ઐં ઐં ઇષ્ટમન્ત્રે કમલભવમુખામ્ભોજરૂપે સ્વરૂપે
રૂપારૂપપ્રકાશે સકલગુણમયે નિર્ગુણે નિર્વિકારે ।
ન સ્થૂલે નૈવ સૂક્ષ્મેઽપ્યવિદિતવિષયે નાપિ વિજ્ઞાનતત્ત્વે
વિશ્વે વિશ્વાન્તરાળે સુરવરનમિતે નિષ્કળે નિત્યશુદ્ધે ॥ ૩॥

હ્રીં હ્રીં હ્રીં જાપતુષ્ટે હિમરુચિમુકુટે વલ્લકીવ્યગ્રહસ્તે
માતર્માતર્નમસ્તે દહ દહ જડતાં દેહિ બુદ્ધિં પ્રશસ્તામ્ ।
વિદ્યે વેદાન્તગીતે શ્રુતિપરિપઠિતે મોક્ષદે મુક્તિમાર્ગે
માર્ગાતીતપ્રભાવે ભવ મમ વરદા શારદે શુભ્રહારે ॥ ૪॥

ધ્રીં ધ્રીં ધ્રીં ધારણાખ્યે ધૃતિમતિનુતિભિઃ નામભિઃ કીર્તનીયે
નિત્યે નિત્યે નિમિત્તે મુનિગણનમિતે નૂતને વૈ પુરાણે ।
પુણ્યે પુણ્યપ્રભાવે હરિહરનમિતે વર્ણશુદ્ધે સુવર્ણે

મન્ત્રે મન્ત્રાર્થતત્ત્વે મતિમતિમતિદે માધવપ્રીતિનાદે ॥ ૫॥

હ્રીં ક્ષીં ધીં હ્રીં સ્વરૂપે દહ દહ રુદિતં પુસ્તકવ્યગ્રહસ્તે
સન્તુષ્ટાચારચિત્તે સ્મિતમુખિ સુભગે જંભનિસ્તંભવિદ્યે ।
મોહે મુગ્ધપ્રબોધે મમ કુરુ સુમતિં ધ્વાન્તવિધ્વંસનિત્યે
ગીર્વાગ્ ગૌર્ભારતી ત્વં કવિવરરસનાસિદ્ધિદા સિદ્ધિસાદ્ધ્યા ॥ ૬॥

સૌં સૌં સૌં શક્તિબીજે કમલભવમુખાંભોજભૂતસ્વરૂપે
રૂપારૂપપ્રકાશે સકલગુણમયે નિર્ગુણે નિર્વિકારે ।
ન સ્થૂલે નૈવ સૂક્ષ્મેઽપ્યવિદિતવિભવે જાપ્યવિજ્ઞાનતત્ત્વે
વિશ્વે વિશ્વાન્તરાળે સુરગણનમિતે નિષ્કળે નિત્યશુદ્ધે ॥ ૭॥

સ્તૌમિ ત્વાં ત્વાં ચ વન્દે ભજ મમ રસનાં મા કદાચિત્ ત્યજેથા
મા મે બુદ્ધિર્વિરુદ્ધા ભવતુ ન ચ મનો દેવિ મે જાતુ પાપમ્ ।
મા મે દુઃખં કદાચિદ્વિપદિ ચ સમયેઽપ્યસ્તુ મેઽનાકુલત્વમ્
શાસ્ત્રે વાદે કવિત્વે પ્રસરતુ મમ ધિઃ માઽસ્તુ કુણ્ઠા કદાચિત્ ॥ ૮॥

ઇત્યેતૈઃ શ્લોકમુખ્યૈઃ પ્રતિદિનમુષસિ સ્તૌતિ યો ભક્તિનમ્રઃ
દેવીં વાચસ્પતેરપ્યતિમતિવિભવો વાક્પટુર્નષ્ટપઙ્કઃ ।
સઃ સ્યાદિષ્ટાર્થલાભઃ સુતમિવ સતતં પાતિ તં સા ચ દેવિ
સૌભાગ્યં તસ્ય લોકે પ્રભવતિ કવિતાવિઘ્નમસ્તં પ્રયાતિ ॥ ૯॥

બ્રહ્મચારી વ્રતી મૌની ત્રયોદશ્યાં નિરામિષઃ ।
સારસ્વતો નરઃ પાઠાત્ સ સ્યાદિષ્ટાર્થલાભવાન્ ॥ ૧૦॥

પક્ષદ્વયેઽપિ યો ભક્ત્યા ત્રયોદશ્યેકવિંશતિમ્ ।
અવિચ્છેદં પઠેદ્ધીમાન્ ધ્યાત્વા દેવીં સરસ્વતીમ્ ॥ ૧૧॥

શુક્લામ્બરધરાં દેવીં શુક્લાભરણભૂષિતામ્ ।
વાઞ્છિતં ફલમાપ્નોતિ સ લોકે નાત્ર સંશયઃ ॥ ૧૨॥

ઇતિ બ્રહ્મા સ્વયં પ્રાહ સરસ્વત્યાઃ સ્તવં શુભમ્ ।
પ્રયત્નેન પઠેન્નિત્યં સોઽમૃતત્વં પ્રયચ્છતિ ॥ ૧૩॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે નારદનન્દિકેશ્વરસંવાદે બ્રહ્મપ્રોક્તે
વિદ્યાદાનવાક્સરસ્વતીહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

એવં રુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે સરસ્વતીસ્તોત્રમ્ ।

There are similarities seen in the siddhasarasvatIstotram2 and sarasvatistotrabrahma on the site.
The stotra is taken from a collection and the source purANa, as mentioned in the colophone, is not checked.

Proofread by Aruna Narayanan

Encoded and proofread by PSA Easwaran

*vidyAdAnavAksarasvatIhRidayastotram*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*